॥अथज्योतिषकल्पतरु॥

ज्यो॰ क॰ श्रीगणेशायनमः॥ॐ नमोव्यक्तनिदानाय॥अथज्योतिषकल्पतरु लिख्यते॥वृंदाविपिन
विनोदीदीनदयालुःस्वभक्तजनवश्यः॥शिवविधिवंदितचरणः श्रीगोपीरमणःपातु॥१॥प्र
१ णम्यसच्चिदानंदंयशोदानंदनंदनं॥प्रवक्ष्येलौकिकस्कंदंयत्रलोकशुभावहं॥२॥प्रथमषष्टिसंव
त्सरीगणनामाहरत्नमालायां॥शकेंद्रकालः पृथगाकृति २२ घ्नः शशांकनंदाश्वियुगैः ४२९१
समेतः॥शराद्रिवस्विंदु १८७५ हृतःसलब्धः षष्ट्या प्रशेषेप्रभवादयोब्दः॥३॥शालिवाहनस्य
शाकःपृथक्कृत्वाआकृत्या २२ गुणयेत्॥शशांकयुगान् ४२९१ मेलयित्वाशराद्रिवस्विंदु
१८७५ भिर्भजेत्॥लब्धंवर्षंभवतितत्शेषाद्द्वादश १२ त्रिंशत् ३० षष्टिसंगुण्य ६० तेलब्धं राम
मासादिकंभवति॥एवंयल्लब्धंपृथक्शाकेवर्षादियोजयेत्॥मासादिकंतत्साध्येरक्षणीयःत १
तःषष्ट्या ६० शेषितः शाकात्प्रभवादयोवत्सराःभवंति॥अत्रमदीयंमतं॥शाकंचतुर्भिःसं४
गुण्यत्रिशून्यंचत्रिभिः ३०३ र्भजेत्॥लब्धंवर्षादयोज्ञेयाशेषंपूर्ववदाकृतिः॥त्रिशून्यत्रि ३०३

भिर्भजेत्लब्धंवर्षादयोभवंतिपुनःशाकोब्देनसहैकीकृत्यषष्टिशेषेप्रभवादयोब्दाभवं
तीति॥ ॥प्रभवोविभवःशुक्लःप्रमोदोथप्रजापतिः॥अंगिराःश्रीमुखोभावोयुवाधाते
श्वरस्तथा॥५॥बहुधान्यप्रमाथीचविक्रमश्चवृषस्तथा॥चित्रभानुसुभानुश्चतारणाख्यो
थपार्थिव॥६॥व्ययश्चब्राह्मीविंशत्यावत्सराःपरिकीर्तितः॥सर्वजित्सर्वधारीचविरोधीविकृ
तिःखरः॥७॥नंदनोविजयश्चैवजयोमन्मथदुर्मुखौ॥हेमलंबीविलंबीचविकारीशार्वरीप्ल
वः॥शुभकृत्शोभकृत्क्रोधीविश्वावसुपराभवौ॥वत्सराविष्णुविंशत्यामुनिभिःपरिकीर्तिताः॥
प्लवंगःकीलकःसौम्यःतथासाधारणोपरः॥विरोधीकृत्ततःप्रोक्तोपरिधाविप्रमाथिनौ॥१०॥
आनंदाख्योराक्षसश्चनलपिंगलसंज्ञकौ॥कालयुक्तश्चसिद्धार्थौरौद्रदुर्मतिदुंदुभिः॥
११॥रुधिरोद्गारीरक्ताक्षीक्रोधनःक्षयकस्मृतः॥वत्सरारुद्रविंशत्याक्रमतःपरिकीर्तिताः॥
१२॥अमीषांफलमाह॥दैवज्ञचिंतामणौ॥ ॥संवत्सरेप्रभवकेहृतेक्ष्माचिदरष्टिःक्षि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ज्यो॰क॰ दग्निकोपः॥ क्वचिद्वाताः क्वचिद्दीतयः स्युस्तथापि लोकाः सुखिनो भवंति॥ १॥ राजानः स्वाभिनंदं
तिलोकाः सौख्यसमन्विताः॥ जलान्नपूरिता पृथ्वी विभवे परिकीर्तिता॥ २॥ रोगैर्बहुविधैर्युक्ता
२ मनुष्या वाजिकुंजराः॥ स्वल्पदुग्धप्रदा गावः शुक्लेब्दे नात्र संशयः॥ ३॥ धनधान्ययुता पृथ्वी नि
त्योत्सवसमाकुलाः॥ नंदंति लोकाः सुखिनः प्रमोदाब्दे न संशयः॥ ४॥ बहुदुग्धयुता गावो वृ
क्षाः पुष्पसमन्विताः॥ लोकाश्च सुखिनो नित्यं प्रजापत्ये भवंति च॥ ५॥ अंगिरसि यत्सर्वं धन ग
धान्यसमाकुलं॥ लोका भवंति सुखिनो राजानो वीतकल्मषः॥ ६॥ बहुवारिप्रदा मेघा बहुस
स्यं च मेदिनि॥ बहुदुग्धप्रदा गावः श्रीमुखेब्दे भवंति हि॥ ७॥ बहुक्षीरयुता गावः सर्वसस्ययुता राम
धराः॥ लोकाश्चैवाभिनंदंति भावेब्दे नात्र संशयः॥ ८॥ सर्वं महर्घतां याति रसतैलघृतादिकं॥ २
यांति वृद्धिं प्रजा नूनं युवासंवत्सरे सति॥ ९॥ संवत्सरे धातरि संप्रवृत्ते सस्या च वृद्धिः खलु
मध्यमः स्यात्॥ भवंति गावो बहुदुग्धसंयुताः वृद्धिः समग्रेक्षुविकारवृद्धिः॥ १०॥ ईश्व

रेब्दे सुभिक्षं स्याल्लोका नित्यं सुखैषिणः॥ क्षौद्रं कार्पासलवणं दुर्लभं स्याच्च गोपयः॥ ११॥ ब
हुधान्ये लोकाः सुखिनस्तथा मपतयः॥ तस्करो भयमतुलं भवति नृणां नात्र संदेहः॥ १२॥ राज्य
नाशाय दुर्भिक्षं तथा तस्करतो भयं॥ क्वचित्सौख्यं क्वचिद्दुःखं प्रवर्तेत प्रमाथिनि॥ १३॥ सर्वस
स्ययुता पृथ्वी नित्यमानंदसंयुता॥ मधुरं लवणं द्रव्यं विक्रमेब्दे प्रणश्यति॥ १४॥ कोद्रवाः शा
लयो मुद्गा निष्पावाश्चणकास्तथा॥ वृषाब्दे च महर्घंति वृद्धिं यांतु चतुष्पदाः॥ १५॥ माषा
मुद्गा मसूराश्च यवाश्चान्य द्विदलात्मकं॥ चित्रभानेः समर्घत्वं तु षधान्यं विशेषतः॥ १६॥ शोक
रोगविनिर्मुक्ता लोकाः सस्याकुला मही॥ राजानः स्युस्तथैव राष्ट्रं च सुभानो नात्र संशयः॥ १७॥ नि
त्यं मेघाः प्रवर्षंति सम्यग्धान्यं न जायते॥ विक्रये क्रयलाभः स्यात्तारणाब्दे न संशयः॥ १८॥ ब
हुवारियुता पृथ्वी सर्वदेशमहर्घता॥ सौराष्ट्रे लाटदेशे सौख्यं पाते च पार्थिवे॥ १९॥ अनावृ
ष्टिश्च दुर्भिक्षं विविधोपद्रवस्तथा॥ जायते नात्र संदेहः प्रवृत्ते व्ययेसति॥ २०॥ वातिवाता

ज्यो॰ क॰ श्च विपुलो मेघा मुंचंति नो जलं ॥ सस्यमहर्घतां यांति सर्वे सर्वजिदात्यये ॥ २१ ॥ शालयः कोद्रवा
मुद्गाः कंगुनीवारमाषकाः ॥ समर्घंति जगत्स्वस्थं जायंते सर्वधारिणि ॥ २२ ॥ वाताग्निमेघ
३ जं दुःखं सर्वसस्या निपीडितं ॥ लोकाः कष्टमवाप्नोति विरोधीनि न संशयः ॥ २३ ॥ शोकरो
गयुता लोकाः सर्वसौख्यविवर्जिताः ॥ राजानो वैरिणिरताः यायंते विकृते खलुः ॥ २४ ॥
ईतयः संप्रवर्तंते शाकरोगकुलाः प्रजाः ॥ देशभंगश्च दुर्भिक्षं खरेब्दे संप्रजायते ॥ २५ ॥ ब
हुक्षीरप्रदा गावा फलपुष्पयुता द्रुमाः ॥ धनधान्ययुता लोकाः नंदंति नंदने सति ॥ २६ ॥ क्व
चिद्वृष्टिः क्वचित्सस्यं क्वदुर्भिक्षतो भयं ॥ क्वचिद्दुस्त्रभयश्चैव विजये नात्र संशयः ॥ २७ ॥ राजानो राम
वाजिनः शूद्रा नटा गायनवादकाः ॥ पीडिता मध्यमा वृष्टिः जयाब्दे नात्र संशयः ॥ २८ ॥ बहुदुः ३
खयुता लोकाः राजानो युद्धदुर्मदाः ॥ अंधीभूतं जगत्सर्वं मन्मथेब्दे न संशयः ॥ २९ ॥ तुषान्नना
शो दुर्भिक्षं दुर्मुखे दुर्मुखा प्रजाः ॥ अल्पवारिप्रदा मेघाः गावः स्वल्पपयःप्रदा ॥ ३० ॥ धान्यना

शस्त्वनावृष्टिः सर्वदेशमहर्घता ॥ हेमलंबे प्रजापीडा भवत्यत्र न संशयः ॥ ३१ ॥ राजानः पा
पनिरताः प्रजानां चोरकृद्भयं ॥ भवत्यत्र महर्घत्वं विलंबे वत्सरे सति ॥ ३२ ॥ कालदोषयुता लो
का राजानो युद्धदुर्मदाः ॥ सर्वान्नानि महर्घत्वं विकारिणि न संशयः ॥ ३३ ॥ कालदोषयुता लोका ॥ ०
चोरोदेशभयं दुःखं क्वचिद्वर्षति वारिदः ॥ लोकाः पापरता नित्यं शार्वरी वत्सरे सति ॥ ३४ ॥ दुर्भिक्षं
राष्ट्रभंगं च क्वचिद्वृष्ट्या अवर्षणं ॥ क्वचिद्वर्षति जलदाः प्लवेब्दे नात्र संशयः ॥ ३५ ॥ धनधान्य
युता लोका जगदानंदसंयुता ॥ सुभिक्षं क्षेममारोग्यं शुभकृन्नाम्नि वत्सरे ॥ ३६ ॥ तथा शोभन
कृद्वर्षे सुरिनो ब्रात्स्यर्णोदयः ॥ भवंति क्षेममारोग्यं नृपा नंदंति नित्यशः ॥ ३७ ॥ रोगव्याधियुता
लोका दुर्भिक्षभयपीडिताः ॥ हाहाभूतं जगत्सर्वं क्रोधने नात्र संशयः ॥ ३८ ॥ सर्वसस्यसमर्घत्वं
सर्वत्र विजयं सुखं ॥ विश्वावसु करोत्याशु कार्यसस्यसमर्घता ॥ ३९ ॥ क्वचिद्युद्धं क्वचिद्वायुः क्वचि
दुर्भिक्षतो भयं ॥ विद्रवंति प्रजाः सर्वाः श्रमभीता पराभवे ॥ ४० ॥ नश्यंति तुषधान्यानि ग्रीष्मे वर्षे

ज्यो॰ क॰ तिवारिदः॥ दुःखव्याधियुता लोकाः पूर्वंगेब्दे न संशयः॥ ४१॥ सर्वसस्यानि जायंते लोकोभयविवर्जि
ताः॥ सुभिक्षं क्षेममारोग्यं भवत्यब्दे चकीलके॥ ४२॥ सर्वसस्ययुता पृथ्वी नदुवारिप्रदा घनाः॥ रा
४ जानश्चाभिनंदंति सौम्येब्दे सुखिनः प्रजा॥ ४३॥ बहुवारिप्रदा मेघा बहुसस्ययुता मही॥ धनधा
न्ययुता लोका वर्षे साधारणे सुखं॥ ४४॥ कचिद्वारिप्रदा मेघा कचिदुःखं प्रजायते॥ कान्यकु
ब्जे न्वहि छत्रे विरोधी दुःखदस्मृतः॥ ४५॥ नाशयंति प्रजा नूनं क्षुत्तृष्णाव्याधिपीडिताः॥ वा
तिवातस्तु विपुलः परिधाविनि वत्सरे॥ ४६॥ अन्नांबुपूरिता पृथ्वी लोकाश्चानंदसंयुताः॥ कोपि
चिदुःखं च दुर्भिक्षं भवत्यब्दे प्रमाथिनि॥ ४७॥ धनधान्ययुता लोकाः सर्वसस्यमहर्घता॥ सम
घतते लांनुनाशः स्यादानंदेब्दे न संशयः॥ ४८॥ धननाशः प्रजापीडा राजानो युद्धदुर्मदाः॥
वकन्याला दिबहुले राक्षसाब्दे न संशयः॥ ४९॥ दुर्भिक्षं व्याधिबाहुल्यं वाताग्निजनितं भयं॥
औषध्यस्य विनश्यंति नलेब्दे नात्र संशयः॥ ५०॥ देशनाशः प्रजापीडा दुर्भिक्षं नर्मदातटे॥ रा

जानो विग्रहे युक्ता पिंगलेब्दे भवंति हि॥ ५१॥ गायनानर्तका गावो महिष्यः शस्यजातयः॥ कालयु
क्तो विनश्यंति लोकाः क्षुद्भयपीडिताः॥ ५२॥ जलसस्ययुता पृथ्वी राजानो निष्ठुराशयः॥ बहु
दुग्धयुता गावो सिद्धार्थो फदा द्रुमाः॥ ५३॥ अल्पतोयप्रदा मेघाः पार्थवा युद्धतत्पराः॥ ईतयो विवि
धाकारा रौद्रेब्दे नात्र संशयः॥ ५४॥ सर्वत्र मध्यमा वृष्टिः सस्यार्घे मध्यमं तथा॥ राजानो नीतरहिता
दुर्मदा दुःखदा प्रजा॥ ५५॥ नंदति लोकाः सुखिनो राजानश्चाविरोधिनः॥ बहुसस्ययुता पृथ्वी दुंदु
भौ नात्र संशयः॥ ५६॥ दुर्भिक्षं च प्रजापीडा राजानो युद्धदुर्मदाः॥ आधयप्रचुरा लोके रक्तोद्गारि
णि वत्सरे॥ ५७॥ रोगशोकयुता लोकाः दुर्भिक्षभयपीडिताः॥ पापाचाररता भूपा रक्ताक्षे नात्र सं
शयः॥ ५८॥ दुर्भिक्षं देशभंगश्च जगदुःखं समन्वितं॥ भवत्यत्रैव संदेहः क्रोधेब्दे क्रोधितः प्र
जा॥ ५९॥ भूमिकंपः प्रजापीडा राजानो विग्रहीकलाः॥ देशभंगोग्निकोपश्च क्षयेब्दे जगतक्षयः॥
६०॥ ॥इति ज्योतिषकल्पतरौ लौकिकस्कंधे प्रभवादिसंवत्सरफलकथनं नाम प्रथमोध्यायः॥

ज्यो॰क अथस्थूलवर्षगणनामसंज्ञानमाहरत्नमालायां॥ ॥इयंहिवृद्धिः परिवत्सराणां बृहस्प
तेर्मध्यमराशिभोगात्॥उदाहृतापूर्वमुनिप्रवर्यैर्नियोजनीयागणनाक्रमेण॥१॥बृहस्पतेरितः॥
५ मध्यमराशिमकरस्थितेगुरुभुक्तिमस्तुविंशत्यंशाः २४ न्तपास्यशेषांशानंदाथप्रागुक्तशकेंद्रकालः इ
तिगणनाक्रमेणयत्रराशौस्थितोगुरुः तत्पर्यंतंवत्सराणांप्रवृत्तिर्नियोजनीयेत्यर्थः॥एतदाह॥तप
सिखलुयदासावुद्गमंयातिमासिप्रथमलवगतः सन्वासवेवासवेज्यः॥निखिलजनहितार्थंवर्षवं
देवरिष्टः प्रभवइतिसनाम्नायायतेब्दस्तदानीं॥२॥तपसिमाघेमासंवासवेधनिष्ठानक्षत्रेप्रथ
मलवगतोवासवेज्योगुरुः॥उद्गयातितदानीयः प्रभवोवत्सरोजायतेइत्यर्थः॥प्रभवादिवत्सरा राम
णांपंचभिर्वर्षैरेकोयुगः एवंषष्टिवत्सरैः द्वादश १२ युगाभवंतितानाहतत्रैवयुगंभवेत्वत्सरपं ५
चकेनयुगानिचद्वादशवर्षसंख्याषष्ट्याभवंतितेषांमधिदेवताश्चक्रमेणवक्ष्यामिमुनिप्रणीता॥३॥
विष्णु १ जीव २ शक्रो ३ दहनः ४ त्वष्टा ५ चाहिर्बुध्न्या ६ पितरः ७ विश्वे ८ सोम ९ श्चंद्रज्वलनौ १०

नासत्या ११ ख्यावंद्राश्च १२ भगः युगमं॥अस्यफलंग्रंथांतरे॥सर्वेलोकाःप्रमुदिताःसुखिनोधर्मतत्प
राः॥राजानोदानशीलाश्चयुगेविष्णोःसमर्चताः॥१॥वेदधर्मपराविप्राराजानोगतमत्सराः॥पुण्यक
र्मरतालोकाःयुगेजीवस्यमंगलं॥२॥बहुवारिप्रदामेघाराजानोयुद्धतत्पराः॥सुभिक्षंवैरतालोकेयु
गेशक्रश्चनिश्चितः॥३॥नानामितापसंतप्ताः दुर्भिक्षःदुःखकर्षिताः॥दहनस्ययुगेलोकाःमेघा
स्वल्पजलप्रदाः॥४॥सिल्पिनःसुखिनोलोकोमध्यमास्युःसजातयः॥कचिद्भिक्षजापीडायुगेत्वा
ष्टुसुखंक्वचित्॥५॥अहिर्बुध्न्ययुगेलोकाःकृषिवाणिज्यतत्पराः॥अन्नवारियुतापृथ्वीशुककीटादि
वृद्धयः॥६॥पितुर्युगेधर्मपरालोकेमघोल्पवारिदः॥तथापिसस्यसंपत्तिश्चोरतस्करतोभयं॥७॥
क्वचिद्दृष्टिरनावृष्टिःक्वचिद्दुःखंसुखंक्वचित्॥विश्वेदेवयुगेलोकातथापिधर्मतत्पराः॥८॥बहुसस्ययु
तापृथ्वीमेघाभूरिजलप्रदाः॥लोकाश्चसुखिनोनित्यंयुगेसोमस्यनिश्चितं॥९॥क्वचिद्दाताक्वचि
त्तोयःक्वचिद्वर्षंतिवारिदाः॥युगेचंद्रज्वलनयोःप्रजाशोकभयाकुला॥१०॥लोकाव्याधिविनिर्मुक्ता

ज्यो॰ क अन्नवारियुता मही ॥ भेषजं सौख्यमतुलं नासत्ये देवता युगे ॥ ११ ॥ गोमहिष्यान्नविपुला पृथ्वी लो
काश्च निर्दयाः ॥ स्त्रीणां सौख्यं च चौराणां भगादित्ययुगे सति ॥ १२ ॥ द्वादशयुगकथनं युगस्य पंचव
६ र्षाणां संज्ञामाह ॥ संवत्सरश्च प्रथमो द्वितीयः परिवत्सरः ॥ तस्मादिद्वावत्सरस्याश्चतुर्थश्चानुवत्सरः ॥
१३ ॥ इद्वत्सरः पंचमः स्यात्क्रमेषां यथाक्रमं ॥ तद्यथा ॥ वृष्टिः समाद्ये प्रमुखा द्वितीये प्रभूततोया कथि
ता तृतीये पश्चाज्जलं सिंचतियः श्चतुर्थः स्वल्पोदकं पंचमवर्षे मुक्तं ॥ १५ ॥ प्रमुखा प्रथमे वृष्टिः प
श्चान्नास्तीत्यर्थः ॥ ॥ अथ वर्षाद्यानयने मामकं पद्यं ॥ शाके द्विशेषे त्रिगुणे चतुर्घ्नी कृत्वा यथा
शमंषट्६नंदा९भास्वत्१२तिथि१५युतं सप्तभिः७ शेषतो भवेद्राजा च मंत्री जलसस्यपा क्रमा राम
त्॥ १६ ॥ सप्तभिः शेषे यथाक्रमं वर्षेश मंत्री अंबुपसस्यपाः स्युरित्यर्थः ॥ राजा १ प्रथमे मंत्री २ द्विती ६
ये तृतीये जलाधिपः ३ चतुर्थे सस्याधिपः ४ रिति ज्ञेयं ॥ ॥ मासाधिपानयनमाह ॥ तद्यथा ॥
वर्षेशाद्द्विगुणान्मासानेकहीनगतान्न्यसेत् ॥ सप्ताव शेषे सूर्यादिस्तन्मासाधिपो भवेत् ॥ १७ ॥

वर्षाधिपांके गतमासान् द्विगुणीकृत्यएकहीनं कृत्वा तत्र योजयित्वा सप्तशेषे सूर्यादिस्तन्मासा
धिपो भवेत् ॥ एवं वर्षाधिपादि सौरचांद्रे तु चैत्रस्य शुक्लप्रतिपत्तिथौ वारस्य यस्य हि ॥ वर्षाधिपः स
विज्ञेयः शुभाशुभफलप्रदाः ॥ १८ ॥ ज्योतिर्निबंधे — न्यदप्याह ॥ चैत्रादि मेषचापार्द्रा तुला मक
रकर्कटाः ॥ नृपो मंत्रिधान्यमेघरसनीरससस्यपाः ॥ १९ ॥ चैत्रशुक्लप्रतिपदि सूर्योदये यो वारः स रा
जा ॥ दिनद्वयव्यापित्वे पूर्ववार एवं उदयमारभ्य सकलदिनव्यापित्वात् क्षयेपि पूर्ववार एव यथा ॥
चैत्रसितप्रतिपदि यो वारः प्रोक्तः स एव वर्षेशः उदयद्वितीये पूर्वोदययुगे त्वेपि पूर्वे स्यादिति ॥ अतोदय
युगुले क्षयदिने त्यर्थः ॥ केचिदाहुः ॥ अमाप्रतिपदोः संधिर्मध्याह्नात्पूर्वतो यदि ॥ तदा तद्दिनयो राजा
परतश्चेत्परो भवेदिति ॥ सुगमं ॥ तत्र सूर्योदयकालिको वार राजेति सर्वसंमतं ॥ एवं मेषसंक्रांते प्रथ
मदिने यो वारः समंत्री एवं चापादौ ज्ञेया ॥ ॥ अथ आयव्ययसाधनेयथा ॥ ॥ तत्राश्लोत्तरीदशा
वर्षाणि यथा सू६ चं१५ मं८ बु१७ श१० गु१९ रा१२ शु२१ इति ॥ ॥ स्वस्वामिवर्षाधिपवत्सरैक्यं त्रिघ्नं३

ज्यो॰ क शराद्यप्तिथिभक्तशेषं॥ आयोथलब्धिः त्रिगुणा३ शरा५ द्या तिथ्युत्थता शेषमितो व्ययस्स्यात्॥
२०॥ योवर्षाधिपस्त्ववत्सरं मेषादिराशिस्वामिवत्सरेण ऐक्यं कृत्वा त्रिगुणितं पचयुतं पंचदशभिः शेषि
७ तं तद्राशेरायुः स्यात्॥ लब्धं त्रिगुणितं पचयुतं पंचदशभिः शेषितः व्ययस्स्यात्॥ यथा वैशोरविः वर्षध
मेषस्वामिकुजः वर्ष८ ऐक्यं १४॥ ॥अथ संक्रांतिधान्यानि गणनाग्रंथांतरात्॥ सूर्यसंक्रांति
दिने तिथिवार नक्षत्रयोगाः॥ रविसंक्रांतिराशीनां ध्रुवांकानां पंचांग नां ध्रुवांकानां धान्यादीनां ध्रु
वांकानां एकीकृत्य सप्तभिः संगुण्य त्रिभिः शेषे फलं ज्ञेयं॥ एकेन समं द्वाभ्यां समर्घं शून्येन महर्घमि
ति ध्रुवांकाः यथा॥ तिथीनां॥ १।२।३।४।५।६।७।८।९।१०।११।१२।१३।१४।१५॥ वाराणां॥ र रा॰ द
वि२१ चंद्र१५ मं१२ बुध१ गु१३ शु१४ श१४॥ नक्षत्राणां यथा॥ अ१८ भ५ कृ२२ रो१४ मृ४ आ१३ ७
पु२८ पू२८ आ३६ म१५ पू१ उ३१ हा१८ चि२५ स्वा१४ वि१४ अ२९ ज्ये३१ मू१८ पु१२ उ२० श्र२५
ध२२ श२४ पू९ उ४१ रे२८॥ ॥योगानां यथा॥ वि१३ प्री७ आ१७ सौ५८ शोभन३६ अ१७

सु१९ धृ४४ शू१३ गं२५ वृ१७ ध्रु२२ व्या१५ ह३५ व१४ सि० व्य१३ व२८ प२५ शि१३ सि२८ सा१२
शु२५ ब्र२२ ऐं२७ वै२६॥ ॥राशीनां यथा॥ मेष३० वृ२२ मि२२ क३५ सिं१९ कं१७ तु२४
वृ१३ ध१६ म१९ कुं३३ मी१५॥ ॥धान्यादीनां यथा॥ धान्य७७ गोधूम१०८ जोध१३३ कोद्रु४१
चणक३५ बिनातुरि७७ व्रिहि७५ तैल६८ घृत४८ खांड९९ गुड४७ शर्करा१०९ नारिकेर७०
सुपारि९५ मंजिष्ट१२८ कार्पास११० रुई४४ सूत१०७ वस्त्र१०९ कंबल१०२ हरिद्रा७३ शुंभि१७
पीपलि२८ मारिच६८ सैंधव१३२ मद्यमांस९ जिरे७२ वेशन५ राई५ हिंग२४ खारिक१९२ सूव
र्ण९२ रूपे९२ शंखं ताकास्य९७ पीतल९९ कर्पूर१०९ कस्तुरि१३४ चंदन१८७ बैल६७ गाई१७
महिषि९२ घोडे७० गाडि चेव यिल१४ एतत्संक्रांतिदिने गणनीयं तद्यथा॥ सूर्यसंक्रांतिराश्यंकं ति
थिवारादि संभवं॥ सर्वांकेन समं कृत्वा सप्तभिर्गुणयेत्ततः॥ २५॥ त्रिभिः शेषे फलं ज्ञेयं तन्मासे यथा
क्रमं॥ एकेन समता ज्ञेया द्वाभ्यां तस्य समर्घता॥ २६॥ शून्ये महर्घतां जाति याद्वि गुणे - पृथक् पृथक्॥ २७॥

ज्यो॰ क॰ अथ सूर्यादिवर्षाधिपानां फलमाह ॥ दैवज्ञचिंतामणौ ॥ अल्पसस्ययुता पृथ्वी वनं दंष्ट्रिभिरावृता ॥
स्वल्पदुग्धप्रदा गावो लोका व्याधिभिरर्दिताः ॥ २८ ॥ सूर्यप्रचंडरश्मिः स्यान्मेघाः स्वल्पजलप्र
८ दाः ॥ नष्टमन्नं तथा कार्पासीदं तिपशुतापसाः ॥ २९ ॥ परस्परं क्षयं याति राजानो युद्धदुर्मदाः ॥ सं
प्रवृत्ते दिवानाथो वर्षमासादिपालने ॥ ३० इति रविः ॥ बहुवारिप्रदा मेघाः बहुसस्ययुता धरा ॥ लो
काश्चैवाभिनंदंति वर्षेशे रजनीपतौ ॥ ३१ ॥ इति चंद्रस्य ॥ प्रचंडवाता नक्तचौरपीडा भवंति लोकाः
खलु दुःखभागिनः ॥ संवत्सरे भूमिसुतस्य जातो सस्यास्य नाशो भुजगप्रकोपः ॥ ३२ ॥ इति भौमः ॥
राजानश्चाभिनंदंति वृद्धिं यांति कलाविदः ॥ जलापूरिता पृथ्वी बुधेऽब्दे नात्र संशयः ॥ ३३ ॥ इ राम
ति बुधस्य ॥ सर्वर्द्धिसंयुता पृथ्वी लोकाश्चानंदसंकुलाः ॥ त्यक्तवैरा महीपाला जाते वर्षाधिपे गु ८
रोः ॥ ३४ ॥ इति गुरुः ॥ नित्यं जयान्विता लोके भूपा लोका आनंदसंयुताः ॥ बहुसस्ययुता पृथ्वी
मेघा जलबहुप्रदाः ॥ ३५ ॥ कांतेरमंति वनिताः संगीतं गविराजिताः ॥ वस्त्रालंकारधारिण्योव

र्षेशे भृगुजे सति ॥ ३६ ॥ इति शुक्रस्य ॥ वाताः प्रचंडाभिपरुषादिग्गव्यरजसावृताः ॥ जलान्व
र्जिता पृथ्वी लोका नाशं प्रयांति हि ॥ ३७ ॥ अब्देशे रविजे जाते यांति वृष्टिं च दस्यवः ॥ ३८ ॥ इ
ति वर्षाधिपानां फलं ॥ अथ जलादिगणना ॥ शाकं वह्निगुणं कृत्वा सप्तभिर्भागमाहरेत् ॥ शेषं
निम्रगुणं कृत्वा पंचपंच नियोजयेत् ॥ ३९ ॥ लब्धं वह्निगुणं कृत्वा वर्षादिः सप्तभागतः ॥ शून्ये
चैव विज्ञेया सर्वमेवं निरूपयेत् ॥ ४० ॥ वर्षा धान्यतृणं शीतं उष्णं वायुश्च रुद्रयः ॥ क्षयश्च विग्र
हश्चैव ज्ञेयमेव क्रमेण च ॥ ४१ ॥ शाकं त्रिभिः संगुण्य सप्तभिर्लब्धं एवात्र स्थापयेत् ॥ शेषं नेत्र
गुणं कृत्वा पंचांगयोजयेदिति ॥ ततेऽजरु विश्वा भवंति ॥ सप्तशेषं यदा शून्यं तदापि पंचैव शू न्यैयो
जयेत् ॥ यल्लब्धं स्थापितं नत्रिगुणं कृत्वा सप्तभिर्हरेत् ॥ शेषे द्विगुणं पंचान्वितं धान्यविश्वा भवति ॥
धान्यात् यल्लब्धं नत्रिगुणं सप्तशेषितं द्विगुणं पंचयुतं तृणविश्वा भवति ॥ एवं क्रमेण शीतादिकं सा
धनीयं ॥ अन्यच्च ॥ शाकः सागरताडितो नगहृतो लब्धं निधायं च वित् ॥ शेषं रस्त्रहृतं शशांकस

ज्यो०क० दितं क्षुत्तट्स्फुष्टिः क्रमात्॥ आलस्यं तनुधर्मश्च गदितः शांतिः स्तथा क्रोधयुक्तं दंभो मे त्रय
थ मासेत्वश्च कथितः पापं च पुण्यं तथा॥ ४२॥ इयं पूर्ववत्साधनक्रमः॥ शाकं च त्रियुतं कृत्वा
९ भागे वेदै र्विधीयते॥ शेषं मेव विजानीयाद्दावर्त्तादि यथाक्रमं॥ ४३॥ आवर्तश्चैव सावर्तः पु
ष्करो द्रोण एव च॥ चत्वारो जलदा ज्ञेया फलं चैषां यथाक्रमं॥ आवर्ते चिंतिता वृष्टिः समावर्ते
नुपूरिता॥ पुष्करे दुष्करा वृष्टिः द्रोणो वर्षति सर्वदा॥ ४५॥ पुनः सुगमं मेघगणनाक्रमं॥ राशि
चक्रं लिखेत्तावो मेषसंक्रांतिमादिकं अष्टाविंशतिकं तत्र लिखेन्नक्षत्रमंडलं॥ ४६॥ सिंधोद
यं द्वयं दद्यात् अन्यत्रैकैकमेव च॥ चत्वारः सागरास्तत्र साध्यया श्चाष्टसंख्यया॥ ४७॥ शं राम
गामितत्र चत्वारि स्तत्रान्य स्थितानि च॥ रोहिणी पतिता यत्र तत्र ज्ञेयं शुभाशुभं॥ ४८॥ समु ९
द्रे पुमहावृष्टिः तटे वृष्टिः श्च शोभना॥ पर्वते बिंदुमात्रा सा खंड वृष्टिश्च संधिषु॥ ४९॥ मेषसं
क्रांतौ यन्नक्षत्रं भवति तदादिकं मेषादिषु क्रमेण दद्यात्॥ यत्र रोहिणी पतति तत्र फलं वदेदि

त्यर्थः॥ ॥वत्सरपुरुषचक्रं॥ रोहिण्यो नलभं च वत्सरतनुर्नाभिस्त्वथ स्वाद्वयं सार्प्य हृषि
त्र दैवतं च कुसुमं च शुद्धैः॥ भने फलं॥ देहे क्रूरनिपीडिते मृत्युनिलं जंताभ्यां भयं क्ष्मद्भुतं॥ पु
ष्पे मूलफलक्षयो सतत् हृदसस्य नाशो ध्रुवः॥ ५०॥ वर्षप्रवेश उक्त नक्षत्रेषु क्रूर युतेषु तत्रांग
नाश इत्यर्थः॥ ॥सस्यजातकं॥ वाराहसंहितायां॥ वृश्चिकवृषप्रवेश भानो र्येवादरायणेनो
क्ताः॥ ग्रीष्मशरत्सस्यानां सदसद्योगाः कृतास्तरमे॥ ५१॥ भानोरलिप्रवेशे केंद्रतस्मात् शुभग्र
हाः क्रांतौ॥ बलवद्भिः सौम्यैर्वा निरीक्षिते ग्रीष्मकविवृद्धिः॥ ५२॥ वृश्चिकवृषप्रवेशे रविसंक्रां
तौ यदा सूर्यो वृश्चिकं वा वृषं याति तत्समये लग्नं प्रसाध्य केंद्रं ज्ञातव्यं॥ अष्टमराशिगते र्को गुरु
शशिनोः कुंभसिंहसंस्थयोः॥ सिंहवटसंस्थयोर्वा निष्पत्तिर्ग्रैष्मिकसस्यानां॥ ५३॥ कुंभे गुरुः सिं
हे चंद्रः अथवा सिंहे गुरुः कुंभे चंद्रः इत्यर्थः॥ अर्कात् सितो द्वितीयो बुधो थवा युगपदेवा। वृश्चि
यो॥ ५४॥ व्ययगतेयां रवितद्वत् निष्पत्तिरतीव गुरुदृष्ट्या॥ शुभमध्येलिनिसूर्ये गुरुशशिनोः स

ज्यो॰क॰ मेपरां समयत्॥५३॥अन्यादिस्थे सवितरि गुरौ द्वितीये उद्धे निष्पत्तिः॥५४॥अन्यादिस्थे वृ
श्चिकप्रवेशः इत्यर्थः॥लाभहि बुकार्थयुक्तो सूर्ये अलिगात् सितेंदुशशिपुत्रैः॥सस्यस्य परा संप
१० त्तिकर्माणि जीवेगवां वापि॥५५॥गवापि गवामपि संपदि इत्यर्थः॥कुंभे गुरुरविशशि सूर्ये अलि
मुखे कुजार्क जौ मकरे॥निष्पत्तिरहस्य महती वपश्चात् परच क्रे रोगभयं॥५६॥मध्ये पापग्रहो
सूर्यः शस्यं विनाशयति अलिगः॥पापसप्तमराशौ जातआतं विनाशयति॥५७॥वृश्चिक संस्था
दर्कात् सप्तम षष्ठोपगौ यदा क्रूरौ॥भवति तदा निष्पत्तिसस्यानाथ परिहानि॥५७॥सूर्ये सप्तमगे इत्ये
यापरत्येर्थः॥अर्थस्थाने क्रूरसौम्ये निरीक्षितः शस्यम जातं॥शस्यं हंति पश्चाद्दुमं निष्पाद्ये त्रव्य
र्थः॥५८॥जामित्रे केंद्रसंस्थौ क्रूरौ सूर्यस्य वृश्चिकस्थस्य॥सस्य विपत्तिं कुरुतः सौम्येदृष्टेन
सर्वत्र॥५९॥अर्थपरिहीनि॥बहुमुकेन स्वल्पान्न इत्यर्थः॥विधिनानेवरवेवृषप्रवेशे शारत्स
मुत्थाना॥विज्ञेयस सस्यानां नाशो यशुभाप वातस्त्रै॥५९॥वृश्चिक संक्रांतौ ग्रीष्मोद्भवानां सस्या

नां लाभो भवति न दाह॥मेषराशिगते सूर्ये ग्रैष्मिकान्नस्य संग्रहे॥कृते मास चतुर्थे तु विक्रेता लाभमादिशे
प्नुयात्॥४२॥वृषे च फलमूलानां धान्यानां संग्रहे सति॥मासे चतुर्थे लाभः स्यात् विक्रेतर्नोत्र संशयः॥४३॥
सर्वरसानि धान्यानि कार्पासावपि नाशकृत्॥मिथुनस्थे दिवानाथे तैलद्रव्य महर्घता॥४४॥तायात्यत्र नसं
देहे च विशेषे क्रय कारयेत्॥गृह्णीयाच्चततः षष्ठे मासे लाभ समादिशेत्॥४५॥कर्क राशिगते सूर्ये गंधतैल म
धूनि च॥पालितानि गृहीत्वा वै लाभो मासे द्वितीयके॥४६॥सिंहे स्वर्णमणिमौक्तिक आतपः॥चर्मास्त्रश
स्त्र चर्माणि गृहीत्वा लाभमिच्छति॥४७॥विक्रेतु पंचमे मासे लाभो भवति नान्यथा॥कन्याराशिगते सूर्ये खर
रोष्ट्र गजवाजिनां॥४८॥षष्ठे मासे च विक्रेतव्य द्विगुण लाभमवाप्नुयात्॥तुलाराशिगते सूर्ये पीतपुष्पाणि
कांचनं॥४९॥काचमणिं च गृह्णीयात् धान्यानि च विशेषतः॥विक्रेता लाभमाप्नोति षष्ठे मासे न संश
यः॥५०॥वृश्चिकस्थे दिवानाथे रत्नमूलफलानि च॥गृहीत्वा लाभमाप्नोति वत्सरार्धे गते सति॥५१॥चाप
गते करत्नानि शंख मुक्ता प्रवालकान्॥कुंकुमं प्रतिगृह्णीयात् वर्षार्धे लाभमाप्नुयात्॥५२॥मृगे कुंभे च

MEMORIAL

PAGE(S) MISSING
NOT AVAILABLE

11 To 14

ज्यो·क· गृहीयात्लोहं धान्यानि शशाकरे ॥ विक्रेतालाभमाप्नोति षष्ठे मासि न संशयः ॥ ५३ ॥ मीनराशिग
ते सूर्ये रत्नमूलफलानि च ॥ गृहीत्वा लाभमाप्नोति वत्सरार्धं गते सति ॥ ५४ ॥ ॥ अथाधिमास
१५ निर्णयः ॥ ॥ रत्नमालायां ॥ सवितृमंडलमेति यदा शशी तदनु संक्रमणं कुरुते रविः ॥ मखमहोत्स
वनाशकरस्तदा मुनिवरैः कथितोधिकमासकः ॥ ५५ ॥ अमावास्यायां यदा रविसंक्रमो भवति त
दाधिमासो भवतीत्यर्थः ॥ अथ यस्मिन्काले अधिकमासो भवति तत्संख्यामाह ॥ ग्रंथांतरात्फलं ॥
द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ॥ चतसृभिर्घटीभिश्च पतत्येकोधिमासकः ॥ ५६ ॥ एकस्मा
धिमासात्पुनरधिमासपतनकालोयं ॥ ॥ अथाधिमासाः फलं ॥ यथा ॥ चैत्रेधिमासे सुभिक्षं स्या राम
त् क्षेमारोग्यं तथैव च ॥ वैशाखे वर्धते देवो मासाश्चतुर एव च ॥ ५७ ॥ ज्वरातिसाररोगास्युः व्याधयो १५
विविधा नृणां ॥ द्वि ज्येष्ठे मरणं राज्ञां यज्ञानां च प्रवर्तनं ॥ ५८ ॥ द्वौ आषाढौ शुभौ धान्यौ सुभि
क्षा भवति यशस्करौ ॥ श्रावणे शूद्रवृद्धिः स्यात्सर्वकामस्तथा नृणां ॥ ५९ ॥ विरोधः क्षत्रिणां तु युद्धं

भाद्रपदे तथा ॥ अश्वयुग्यन्यचक्रेण चोरैः संपीड्यते प्रजाः ॥ ६० ॥ विरोधस्तत्र भवति दुर्भिक्षं तत्र दा
रुणं ॥ राजभार्या विनश्यंति विप्राणां वृद्धिरुत्तमाः ॥ ६१ ॥ द्वि कार्तिके शुभं धान्यं नाशो क्वमरणं क
चित् ॥ नानायज्ञप्रवर्तंते विप्राणां वर्धनं तथा ॥ ६२ ॥ द्वि मार्गशीर्षे सुभिक्षं नीरोगाश्च प्रजास्तथा ॥
द्वि पौषे वर्तमाने तु राज्ञा धर्मपरो भवेत् ॥ ६३ ॥ द्वि माघे भवति क्ष्मापः प्रजादंडधरः सदा ॥ द्वि फाल्गुने
शुभे धान्ये निरोगाः सततं प्रजाः ॥ ६४ ॥ सुभिक्षं सर्वदेशेषु ककहो नात्र कुत्र चित् ॥ कार्तिकाद्यात्तथा
पंच वृद्धिर्नवक दाचिनः ॥ ६५ ॥ ॥ इति श्री कविचूडामणिविरचिते ज्योतिषकल्पतरौ लौकिक
स्कंधसूर्यचारवशेन मासफलकथनं नाम तृतीयोध्यायः ॥ ॥ अथाधिकमासान्मनुष्याणां रा
शिराशिफलं ॥ गार्ग्यसंहितायां ॥ मुनिशून्यखचंद्रेण १००७ गुणिताभुक्तवत्सराः ॥ खखखाष्ट ८००
हृभवे द्वारो जन्मवारादिकैर्युताः ॥ १ ॥ चैत्रे चारु सुखं ददाति नियतस्तोयं सुखं माधवे ज्येष्ठे चारि विना
शनं कृषिहरं आषाढवातोनलं ॥ राज्यं श्रेष्ठिकरं प्रजाक्षयकरं रोगस्तथा श्रावणे आनंदं च नभस्य

ज्यो·र· आश्विन शुभो वाराहलकादयः ॥२॥ मुनिशून्यखचंद्रेण १००७ शकाब्दगतवत्सराः ॥ गुणितावा
मनुष्याणां जन्मादिगतवत्सराः ॥ गुणिता खखाष्ट ८०० ऽब्दा अष्टशताब्दमेकवारो भवतितो वारोश
१६ काब्द वर्तमानादिवाराणां अधिमासावधि गुणनीया एकत्र संयोजयेत् ॥ वा मनुष्यं भोज्ञवत्सरादि
वाराणां अधिमासावधिं गणनीया पूर्ववारे योजयित्वा तु भोसप्तभिर्भजेत् ॥ एकशेषे चेईत्र फलं
द्विशेषे वैशाख फलं एवं सप्त फलं ज्ञेयमिति ॥ अथ हीनमासमानयनं ॥ ब्रह्मसिद्धांतेपि ॥ असं
क्रांतिमासो अधिमासस्फुटस्याद्विसंक्रांतिमासः क्षयाख्यः कदाचित् ॥ क्षयः कार्तिकादित्रयेनान्य
तः स्यात् ॥ सप्तवर्षमध्ये अधिमासद्वयं स्यात् ॥ ३ ॥ अन्यच्च भास्वत्यां ॥ अब्दोर्के १२ निघ्नेत्रिभिर्वि राम
हीनो गोरूप १९ भिर्भागयथावशेषं ॥ नंदाधिकः सप्तमघुक्रमेण द्विसंक्रमे मासि सहस्त्रिनष्टः ॥ १६
४ ॥ अन्यच्च ॥ शाकश्चांगध्नयुक्तोकचंद्रा १९ वशेषा मघुवृद्धिमासाः असंक्रांतितो वा ॥ मनुर्वेद्वि
रुद्राखभूयेषु सर्पारसत् खे चरुद्राश्च मध्यास्त्रिशक्राः ॥ ५ ॥ तत्र हीनमासफलमाह ॥ दैवचिंतामणौ

कार्तिको हीनमासश्च धर्मनाशधनक्षयः ॥ मूंछजातश्च वृद्धिश्च दुर्भिक्षं मरणं ध्रुवं ॥ ६ ॥ मा
र्गशीर्षेण जायंते हिमपाताल्लजायते ॥ प्रजानां क्षयमाप्नोति देशभंगो महर्घता ॥ ७ ॥ पौषेण व्या
धिदारिद्राल्लाकानां भयपीडिताः ॥ सर्वसस्यमहर्घाणि जायंते शलभास्तथा ॥ ८ ॥ माघेन सर्पकीटा
नां व्याधिमाप्नोति मानवः ॥ वातास्मिज्वलिता लोकाः देशभंगैश्च महर्घताः ॥ ९ ॥ फाल्गुनेन ष्टेता या
तिरसानां क्षयकारकः ॥ उत्सवा सर्वनश्यंति शोकरोगयुता मही ॥ १० ॥ ॥ अथ चंद्रचारः संक्षे
पमात्रेण ॥ भास्वत्यां ॥ मीने मेषे गतश्चंद्रे सततं दक्षिणोन्नतं ॥ अन्ये चोत्तरशृंगस्य समस्ते वृषकुंभयोः
॥ ११ ॥ क्षिवृरंस्या समं चंद्रे दुर्भिक्षं दक्षिणोन्नतं ॥ दुष्टि रोगभयं चैव सुभिक्षं चोत्तरोन्नतं ॥ १२ ॥ इति
चारचंद्रफलकथनं ॥ ॥ अथ कुजचारवशेन शुभाशुभफलमाह ॥ दैवज्ञचिंतामणौ ॥ तत्र य
दा भौम वक्री भवति तदा विचारमाह ॥ उष्णमस्तु मुखं व्यालं लोहिताख्यं तथैव च ॥ निस्त्रिंशमुशलं चे
ति पंच वक्राः कुजस्य हि ॥ १३ ॥ भौमस्य वक्रे पंचाभिधानं ॥ यथा प्रथमं उष्णं ॥ अश्रुमुखं ॥ २ ॥ व्याल

ज्यो॰ क॰ मुखं ॥३॥ लोहितास्यं ॥४॥ निस्त्रिंशमुशलं ५ पंचेति ॥ फलनिरूपणमाह ॥ सप्ताष्टनवमर्क्षेषु वक्रि
तश्चोदयात् कुजः ॥ तद्वक्रमुष्णसंज्ञं स्यात्तत्र नश्यति याज्ञिकः ॥१४॥ शोकरोगाः कलालोकाः क्ष
१८ यं यान्ति तृषार्दिताः ॥ अतिशयेन मुष्णेन दृष्टिदग्धश्च भूतले ॥१५॥ तत्र तस्मिन्नक्षत्रे स्थितः सन् भौ
मोदयो भवति ॥ तन्नक्षत्रमारभ्य गणनया यदि सप्तमाष्टमे नवमे ऋक्षे वक्री भवति तद्वक्रस्य उष्णसं
ज्ञा ॥ तत्र फलं तत्र नश्यतीत्यादि ॥ एवं परत्र विबोधव्यं ॥ दशमैकादशे वापि द्वादशे वा धरासुतः ॥ क
रोति वक्रमुदयात्तदाऽस्त्रमुखमीरितं ॥१६॥ रसान् दूषयति क्षाधीन्मयं देवो न वर्षति ॥ रोदनास्य फलं
स्मृतं ॥१७॥ इत्यश्रु फलं मुखं ॥ अथ व्यालमुखं ॥ त्रयोदशर्क्षे च चतुर्दशे वा करोति वक्रं यदि चोदया राम
त् कुजः ॥ वक्रं तदा व्यालमिति ब्रुवंति व्यालादिभीतिं मनुजाः स्म भिक्षं ॥१८॥ सुगमं व्यालमुखफलं १८
॥ अथ लोहिताननफलं ॥ पंचदशे षोडशे यो निवृत्ते रुधिराननः ॥ वक्रं स्यान्मुखरोगांश्च भवस्यन्नमह
र्घताः ॥१९॥ अस्य रुधिराननसंज्ञा फलमिति ॥ ॥अथ मूशलाननफलं ॥ अष्टादशा सप्तदशाद्विनि

वृत्ते भूतनये सिमुशलं स्यात् ॥ चौरेभ्यो भयमतुलं करोत्यवृष्टिं महर्घ्यं ॥२०॥ निस्त्रिंशमुशलास्य असि
मुशलसंज्ञा ॥ इति पंचमुखं फलं ॥ ॥अथ नक्षत्रविशेषवक्रोदयफलमाह ॥ वैश्वदेवे २१ नैवक्रे तु
फाल्गुनी ११ रुद्रियदा ॥ अस्तं याति च रोहिण्यां भौमस्त्रैलोक्यनाशकृत् ॥२१॥ तिष्येत्व क्रमतिं या
ति श्रुता २२ वुदयमागतः ॥ नरान्नविनश्यंति लोका दुर्भिक्षपीडिताः ॥२२॥ पित्र्यं १० ब्राह्म्यस्य विशाखां
भिंदन् भौमः करोति दुर्भिक्षं ॥ मरणं करोति घोरं रोहिण्यां रक्षिणे त्वनावृष्टिं ॥२३॥ पित्र्यं मघां ब्राह्म्यं अ
भिजित् ० दक्षिणस्यां दिशि ॥ ॥अथ नक्षत्रसंचारफलमाह ॥ दैवज्ञचिंतामणौ ॥ श्रुतौ मूले च
शाक्रे च प्राजापत्ये रास्ये च ॥ अनुराधास्ववान्यर्क्षे १५ रौद्रौ वा विशेषतः ॥२४॥ संचरन् भूसुतो हंति मेघा
न्संवर्तकोनपि ॥ अश्विन्यां च भरण्यां च कृत्तिकायां तथैव च ॥२५॥ यदा भूमिसुतो याति स्म भिक्षं जायते तदा ॥
मघादित्यार्क मूले पुब्रात्स्ये प्यकपदास्व ॥२६॥ श्रुतिभे च विशाखायां कुज चारोदयो शुभो ॥ अन्यक्षे चरते
भौमे मध्यमं फलसंमतं ॥२७॥ मघादिषु उदितो पि शुभ इत्यर्थः ॥ अथ मेषादिराशिस्थस्य भौमस्य फलमाह ॥

ज्यो॰ क॰ मेघमालायां॥ भौमे मेषे चैव धान्यं धान्यं याति महर्घतां॥ क्रोधवंतो जनाः सर्वे पश्चादं नमसे सर्घता॥ २८॥
मिथुने कन्यकायां तु यदा भौमः प्रवर्त्तते॥ रसगोरसधान्यानि महर्घाणि भवंति च॥ २९॥ यदा कर्कगते भौमस्त १
१८ दा दुर्भिक्षतो भयं॥ सिंहराशिगते भौमे शुभसंगविवर्जिते॥ ३०॥ अनावृष्टिश्च भवति कन्यकायां विशेषतः॥
तुलागते भूमिपुत्रे सर्वसस्यमहर्घताः॥ ३१॥ कार्पासिकं पट्टवस्त्रं क्षौद्रं दुर्लभतां व्रजेत्॥ यदा वृश्चिकराशि
श्च भूमिपुत्रः समाश्रितः॥ ३२॥ शस्त्राणि च महर्घाणि भूपाला युद्धतत्पराः॥ कार्मुकं च यदा याति भूमिपुत्र
स्तदा भयं॥ ३३॥ कार्पासं च तृणं काष्ठं बहुमूल्यं च तु व्यदं॥ मकरस्थे भूमिपुत्रे घृततैलमहर्घताः॥ ३४॥ सुभिक्षं
जायते तत्र प्रजानंदति — —र्दताः॥ कुंभराशिगते भौमे सर्वसस्यमहर्घता॥ ३५॥ तथा विलोकानंदंति राजानो भ राम
यवर्जिताः॥ मीनं याति यदा भौमः कर्तव्यः संग्रहस्तदा॥ ३६॥ तृणकाष्ठपशूनां च विक्रये लाभमादिशेत्॥ ३७॥ १८
इति राशिफलं॥ ॥ वक्रे ते च धरापुत्रे दुर्भिक्षं च महद्भयं॥ भवत्यारक्तवस्तूनां तथान्या महर्घता॥ ३८॥ मीनरा
शौ धनुषि च भौमो गच्छति वक्रतां॥ तदा भयाकुला पृथ्वी सर्वसस्यमहर्घता॥ ३९॥ वृषे तुलाधरे भौमे यदा गच्छति
वक्रतां॥ दुर्भिक्षं लोकपीडां च देशे भगमहर्घताः॥ ४०॥ इति भौमचारशुभाशुभकथनं॥ ॥

अथ बुधाचारात् शुभाशुभफलं दैवज्ञचिंतामणौ॥ वैश्वदेवे मगे ५ सौम्ये २१ श्रुति २२ वासव १८ रोहिणी
॥ यदा चंद्रसुतो हंति प्रजाश्चातीव दुःखदः॥ ४१॥ पंचर्क्षेषु यदा सौम्यो रौद्रादि ६॥ ७। ८। ९। १०। षु समा
श्रितः॥ शस्त्राणां वृष्टिसंतापैर्लोका दुःखं प्रयांति च॥ ४२॥ हस्तादि तिष्ठर्क्षाणि संचरन् सोमनंदनः॥
करोति पृथ्वीसस्याढ्यं रससस्नेहाज्यवृष्टिकृत्॥ ४३॥ उत्तराफाल्गुनी चाहि १२ बुध्न्यं २६ याम्यं हुताश
नं॥ प्राणिनां धातुनाशाय संचरन् बुध ईरितः॥ ४४॥ अश्विनी रेवती मूलं वरणर्क्षेषु संचरन्॥ बुधे च
वीराणां हंति तुरगान् जलजान् तथा॥ ४५॥ ज्येष्ठाक्यारे २५ भगे ११ तोये २० संचरन् सोमनंदनः॥ तस्करा
द्युपद्रुतः शस्त्रैः प्राणिनां भयकारकः॥ ४६॥ इति नक्षत्राचारः॥ ॥ अथ राशिचारः॥ मेषवृ
श्चिकयोः सौम्ये पशूनां च महर्घता॥ भवत्यत्र न संदेहो वृष्टिः स्यान्मध्यमा तदा॥ ४७॥ वृषे यदा बुधो या
ति तदा पृथ्वी भयाकुला॥ राजानो युद्धबहुलं लोकपीडा च जायते॥ ४८॥ कन्यामिथुनयोः सौम्यो भ
वत्यत्र यदा तदा॥ कांचनस्य महर्घत्वं तदा मेघपरिक्षयः॥ ४९॥ कर्कराशिस्थिते सौम्ये सर्वसस्यमह

ज्यो॰ क॰ र्घता॥ वर्षंति वारिदा लोकाः राजानश्चापि हर्षिताः॥ ५०॥ सिंहराशिस्थिते सौम्ये धान्यार्घं च समं स्मृ-
तं॥ सौवर्णं दंतकाष्ठं च कणं वाति महर्घतां॥ ५१॥ वणिजस्थे सोमपुत्रे अलं वर्षंति वारिदाः॥ सर्वसस्यम-
१९ हर्घत्वं राजानः कलहप्रियः॥ ५२॥ कार्मुकं च यदा सौम्यो मीनं चापि समाश्रितः॥ तदा गजाश्चयं याति
राजानो युद्धकांक्षिणः॥ ५३॥ नक्रकुंभे चंद्रसुते नाशुभं न शुभं भवेत्॥ नृपाणां च प्रजानां च तदा
सस्यसमर्घता॥ ५४॥ वक्रते चंद्रपुत्रे तु धनधान्यकुला धरा॥ मार्गीभूते महर्घंति सस्यानि विविधानि
च॥ ५५॥ इति बुधचारः॥ ॥अथ गुरुचारः॥ तत्र यस्मिन्मासे गुरुः अस्त उदये तित्र वि-
चारणीयमाह॥ मेघमालायां॥ येन देवगुरुर्याति नक्षत्रेण सहोदये॥ तत्संज्ञमब्दं भवति मासं क्रम-
वशात्ततः॥ ५६॥ वर्षाणि कार्त्तिकादीनि द्वौ रीक्षे वत्सरं क्रमात्॥ भवत्येकादशांचांत्यं तृतीयं च त्रिभा-
द्दकं॥ ५७॥ येन नक्षत्रेण सह देवगुरुः उदेति॥ तन्नक्षत्रं संज्ञावं भवति॥ मासानां क्रमेण॥ तत्राब्दं
कृत्तिकादि नक्षत्रद्वयं द्वयं उदेति॥ यथा॥ कृत्तिकारोहिणीवासद्गुरुरुदेति तदा कार्त्तिको वत्सर इति॥

DR. BHAU DAJI

दिननक्षत्राणि गणयेत्



मृगशिराद्वयं यदा उदेति तथा मार्गशीर्षा बहु राज्यं ॥ एवं वैश्वदेवादित्रयाणां ऋक्षं गुरु उदेति तदा श्रावण
बहु राज्यं एवं सर्वेषां ॥ वृषादिराशिषु नक्षत्रद्वयं मृगादिराशीषु नक्षत्र तृतीयमिति ज्ञेयं ॥ ॥अथ कार्ति
के तु भयं विंद्यात् क्षुत्रुस्त्रादिकं महत् ॥ शाकवानलं वृत्तीनां नाशः स्यात्प्रभुजि विनां ॥५८॥ मिथोभि
द्रकरो मार्गो महादुर्भिक्षकरकं ॥ शालभाद्न भयदः प्राणिनां व्याधिकारकः ॥५९॥ परस्पराधिनां नृ
तिराजानां सुखिनो जनाः ॥ धान्यार्घश्च द्विगुणः पौषश्चेन्नात्र संशयः ॥६०॥ सुभिक्षं क्षेममारो
ग्यं वर्षणं पितृपूजनं ॥ भवत्यत्र न संदेहो माघे धर्मरता नराः ॥६१॥ क्वचिद्दुर्भिक्षजनको नारीदौर्भाग्य
हारकः ॥ क्वचित्क्षेमकरः प्रोक्तः फाल्गुने भयदः क्वचित् ॥६२॥ मंदानंदाश्च राजानो मेघाः स्वल्पजलप्रदाः ॥
अन्नं च दुर्लभं लोके चैत्रे रूप्यवतां क्षयः ॥६३॥ वैशाखे धर्मरताः प्राणी वैराः परस्परं भूपाः ॥ सुखिनश्च सर्वे
लोकाः निष्पत्तिं सर्वधान्यानां ॥६४॥ सस्यवृक्षलतावृष्टिः वृद्धिश्च नृपनाशनः ॥ कदन्नवृद्धिजनकः
ज्येष्ठो वर्षप्रकीर्तितः ॥६५॥ अन्योन्यभद्रो भवति प्रजानां क्वचित्सुभिक्षं क्वचिदन्ननाशः ॥ आषाढके अ

डाक्टर भाऊदाजी इत्यांच्या संग्रहांतील
Dr. BHAU DAJI
डाक्टर भाऊदाजी इत्यांच्या संग्रहांतील
Dr. BHAU DAJI

ज्यो॰ क॰ नृपविग्रहस्यात् स्वल्पं जलं पतति वारिवाहः ॥६६॥ सर्वसस्ययुता पृथ्वी प्रजाश्चानंदसंयुता ॥ बहुवारिप्रदा
मेघाः श्रावणेऽब्दे भवंति हि ॥६७॥ क्वचिल्लोकाश्च नंदंति क्वचित्क्रंदंति पीडिताः ॥ क्वचिद्बहुरसधान्यानि नभस्ये
२० ऽब्दे भवंति हि ॥६८॥ धनधान्ययुता लोका बहुपुष्पफला द्रुमाः ॥ राजानो वीतशोकाश्च वर्षे चाश्विनसंज्ञ
के ॥६९॥ इति कार्त्तिकादिगुरुवर्षफलं ॥ ॥भुजंगर्क्षे यदा जीवो नाशं याति चतुष्पदः ॥ घृतस्य संग्रहः
कार्यः तदा लाभश्चतुर्गुणः ॥७०॥ त्यक्त्वाश्लेषां मघां याति यदि देवपुरोहितः ॥ बहुवृष्टियुता मेघाः प
श्चाद्दुर्मभयं महत् ॥७१॥ इति नक्षत्रफलं नेष्टं अन्येषु शुभं ॥ ॥अथ राशिफलं ॥ यदा देवगुरुर्मे
षे स्यात्सुभिक्षारोग्यसंपदः ॥ जीवे वृषे सुभिक्षं स्याद्घोरसस्यमहर्घताः ॥७२॥ यदा मिथुनगे जीवे तदा दु राम
र्भिक्षतो भयं ॥ नृपाणां विग्रहस्तत्र सस्यनाशमवर्षणं ॥७३॥ कर्कस्थिते देवगुरौ दुर्भिक्षं २०
नृपविग्रहः ॥ भवत्यत्र न संदेहः पृथ्वी धान्यसमन्विता ॥७४॥ सिंहे गुरौ स्वल्पसस्य बहुक्षी
रं प्रजायते ॥ मंगलानां च सर्वेषां उत्पादा बहुशोकदा ॥७५॥ कन्याराशिगते जीवे जलं वर्ष

ति वारिदः ॥ प्रजास्तत्र निरातंकाः सुभिक्षारोग्यसंपदा ॥७६॥ तुलाराशिगते जीवे प्रजाव्याधिप्र
पीडिताः ॥ अन्नं समर्घतां याति क्वचित्तत्र महर्घताः ॥७७॥ यदा वृश्चिकराशिस्तु देवपूज्यः समाश्रि
तः ॥ अन्नं दुर्लभतां याति मेघाः स्वल्पजलप्रदाः ॥७८॥ कार्मुके च स्थिते जीवे गोधूमादि मह
र्घताः ॥ वर्षाकाले च सस्यानि महर्घंति तिला गुडाः ॥७९॥ मकरस्थे देवगुरौ दुर्भिक्षं दारुणं भवे
त् ॥ विग्रहेति राजानः त्रिभिर्मासैः सुभिक्षता ॥८०॥ कुंभे यदा गुरुर्याति प्रजा दुर्भिक्षपीडिताः ॥
पश्चिमे च महाघोरं दुर्भिक्षं जायते भयं ॥८१॥ यदा सुरगुरुर्मीने प्राच्यां मंत्र महर्घताः ॥ राजानो
राजभक्ताश्च लोकाः पापरतास्तदा ॥८२॥ वक्रीभूते देवगुरौ सर्ववस्तु महर्घता ॥ मघायां यदि
वक्री स्याद्राजानः सुखिनस्तदा ॥८३॥ मार्गीभूते तु तत्रैव तदा घृतमहर्घता ॥ स्वगृहस्थो देवगु
रुर्यदा वांछति वक्रतां ॥८४॥ संग्रहः सर्वधान्यानां क्रये लाभश्चतुर्गुणाः ॥ मेषादिसर्वराशीनां
फलं चैव यथाक्रमं ॥८५॥ इति चूडामणिकृतज्योतिषकल्पतरौ लौकिकस्कंधे चंद्रचीरादिक

थनं नाम चतुर्थोऽध्यायः॥ ॥अथ शुक्रचारफलमाह॥ दैवज्ञचिंतामणौ॥ मिदुनाभृगु
जायंते नक्षत्रं तु हविर्भुजं॥ भवंत्युन्मार्गगामिन्यो नद्यः पृथ्वी जलाकुलाः॥१॥ भार्गवयद्विभि
न्नं तिरोहिणीमस्थिकेशनिचयै धराकुला॥ रौद्रभे चरन्नाशकं दुःशनको रौद्रभे भवति वा
रिदो भृगुः॥२॥ पुनर्वसुस्थभयमातनोति पुष्यस्थितो यच्छति वारिभूरिः॥ अहिर्गतः सर्वभयं
विधत्ते पित्र्यं प्रयातो जलदः क्वचित्स्यात्॥३॥ भाग्यर्क्षे विचरन्सितो बहु जलं यच्छत्यथार्यम्ण
भेपां चालान्निति हंति कौरवजनान्हस्ते जलध्वंशकः॥ चित्रायां विजलाकरोति वसुधां स्वा
तौ महद्वृष्टिकृत् इंद्राग्न्योश्च भयंकरोति वनिजां मैत्रे चरन्लोकवधः॥४॥ ज्येष्ठायां नृपतिन्हं
ति जलजा मूले त्वनावृष्टिकृत् तोये चोपगमान्विनष्टिवितयं विश्वे महाव्याधयः॥ कर्णव्या
धिभयं श्रुतौ वसुगतः शुक्रश्च पाखंडिनो हरापाद्वारुणभे च शौंडिकजनान् घातश्च पूर्वान्नृपां
॥५॥ अश्विन्यां हयनाशः स्यात् भरण्यां कृषिजीविनां॥ भयं भाग्ये चरेद्वत्यां अर्यम्णे च जल

क्षयः॥ पुनर्वसू मघायां च भृगुपुत्रो यदा स्थितः॥ सर्वधान्यमहर्घत्वं नात्र कार्या विचारणा॥७॥
इति नक्षत्रफलं॥ ॥अथ शुक्रोदयफलं॥ याम्यापभचतस्त्रं प्रथममंडलं मघां शुभावह
प्रोक्तं॥ अत्राभ्युदितः शुक्रः कलिंगवंगेषु भयजनकः॥८॥ अन्येनापि ग्रहेणात्र यदाक्रां
तो भृगोसुतः॥ तदा भद्रस्य यौधेये सुरसेनां निहंति च॥९॥ आर्द्रादिभं भश्च षट्कं च मंडलं मत
न्द्वितीयाख्यातं॥ तत्रान्नवारिवृष्टिर्भवति शिवं नवेदवृत्तीनां॥१०॥ अत्राभ्युदिते शुक्रे य
द्यपि षट्कश्चिद्दारोहेत्॥ म्लेच्छाश्च जीवि शूद्रान्वैदेहांश्चापि भयं सृजति॥११॥ मघादिपं
च भे शुक्रो भ्युदितो ग्रहसंयुतः॥ दुर्भिक्षं शत्रुभीतिश्च शूद्रप्रौढान्निहंति च॥१२॥ वातायं
भत्रयं चैव चतुर्थं मंडलं स्मृतं॥ अत्रोदितः सितो ज्ञेयो ब्रह्मक्षत्रान्नवृद्धिकृत्॥१३॥ अ
त्राक्रांते ग्रहैः शुक्रे विनाशः किं न जायते॥ सूरसेनपुलिंदानां प्रत्यंतवासिनामपि॥१४॥
ज्येष्ठाद्यं पंच नक्षत्रं पंचमं मंडलं भवेत्॥ अत्रोदितसितः कुर्यात् दुर्भिक्षं रोगतो भयं॥१५॥

ज्यो॰क काश्मीरास्मकमत्स्याश्च वाहदेवी अवंतिकां ॥ निहंत्येव ग्रहैर्युक्तः सेषवा काशिकां तथा ॥
१६ ॥ षडक्षं मंडलं षड्क धनिष्ठा धमुदाहृतं ॥ अत्रास्थितो भृगुः कुर्यात् धनधान्यकुलं जगत् ॥१७
२२ अत्रारोहेद्परो विदेहगांधारशूलिक विनाशनाशः ॥ शकयवनदासवृक्षिः भवंति तदा नात्र सं
देहः ॥ १८ ॥ वातायं चैव शाक्तायं परस्यां मंडलं शुभं ॥ मघायं शुभदं पूर्वे शेषाणि सदृशानि च ॥
१९ ॥ वातायं शाक्तायं जन्मडलं परस्यां पश्चिमदिशा उदितः शुक्रः शुभः पूर्वे नेष्टः ॥ मघायं
षु मंडलं पूर्वे उदितं शुभं परे न्ने ष्टं शेषाणि सर्वत्र समानीत्यर्थः ॥ ॥ अथ मेषादिराशिचार
फलं ॥ मेषे समाश्रिते शुक्रे तथा चागवि संस्थिते ॥ सर्वधान्यमहर्घत्वं नात्र कार्या विचारणा ॥ २० राम
मिथुने कर्कटे संस्थे यस्मिन्काले भृगोः सुते ॥ वातवाति तदा नित्यं जलवृष्टिश्च पातये ॥ २१ २२
सिंहराशौ समायाति तदा दैत्यपुरोहितः ॥ सुवर्णपशुसस्यानि नाशयंति च वारिदः ॥ २२ ॥ यदा
शुक्रोंगना याति तदा सस्यमहर्घताः ॥ भवत्यत्र न संदेहः शिल्पिनो दुःखपीडिताः ॥ २३ ॥ तुला

संस्थे दैत्यगुरौ प्रजानंदं नित्यशः ॥ बहुसस्ययुता पृथ्वी राजानो वरमाश्रितः ॥ २४ ॥ वृश्चिके च य
दा शुक्रः सर्वधान्यमहर्घताः ॥ निरांतका प्रजास्तत्र पृथ्वी चानंदसंयुताः ॥ २५ ॥ यदा काले
दैत्यगुरुः धनुराशिं समाश्रिताः ॥ तदन्नानि महर्घत्वं हिमपातान्विनश्यति ॥ २६ ॥ मकरस्थे
दैत्यगुरौ सर्वधान्यं महर्घताः ॥ गुडक्षौद्रं च कार्पास रसैः सर्वं महर्घताः ॥ २७ ॥ कुंभे ह्यषे स्थिते
शुक्रे सुभिक्षं प्रचुरं जलं ॥ भवत्यत्र न संदेहो लोकाः सर्वे निरामयाः ॥ २८ ॥ वक्रीभूते दैत्यगु
रुः राशे राश्यंतरं व्रजेत् ॥ तदा धान्यमहर्घत्वं घृततैलं समर्घताः ॥ २९ ॥ वृषे तुला धरे कर्के व
क्रं गच्छति भार्गवः ॥ पुनर्मार्गे च भवति तदा प्रमुदिताः प्रजाः ॥ ३० ॥ घृततैलं समर्घत्वं सुभि
क्षं नृपतेः सुखं ॥ उत्सवं सर्वदेशेषु गृहे गृहे महोत्सवं ॥ ३१ ॥ यदा शुक्रे स्त्वेकपक्षे करोत्य
स्तमयोदयौ ॥ तदा लोकं सहस्राणां पृथ्वी विव्रति श्रोणितं ॥ ३२ ॥ इति शुक्रचारकथनं ॥ ॥
अथ शनिचारफलं ॥ नक्षत्रफले दैवज्ञचिंतामणौ ॥ अश्विन्यां च गते मंदे तैलद्रव्याणि नित्यशः ॥

ज्यो॰ क सर्वरसमहर्घंतिमासाब्दपविनिश्चितं॥३३॥भरण्यां द्वितीये पादे यदा मंदः समाश्रितः॥सर्वोप
रस्परं युद्धं पूर्वदेशे महद्भयं॥३४॥कृत्तिकायां यदा सौरिः प्रजानंदंति निस्वशः॥सुभिक्षं
२२ जायते तत्र क्रये लाभस्तथाविधः॥३५॥रोहिणीमृगशीर्षे च यदा सौरिः समाश्रितः॥कुंजराः प्रलयं
यांति सर्ववस्तु महर्घता॥३६॥रौद्रादिपंचगे मंदे सर्वधान्यस्य संग्रहः॥कर्तव्यो द्वित्रिके मासे विक्री
ते लाभमादिशेत्॥३७॥पूष्ये पुनर्वसे चैव यदा तिष्ठति सूर्यजः॥आदौ सुखं ततो दुःखं लोकानां किल
जायते॥३८॥भुजगर्क्षे यदा मंदः सर्वायुधमहर्घता॥हंति सर्वान् जलचरान् वनिजो घोषवासिनः॥
३९॥मघां याति यदा मंदः तदा सिंहलके भयं॥कुंजरस्य भवेल्लाभो विक्रीते तुरगस्य च॥४०॥पूर्वाफल्गु राम
निमे मंदे राजानो भयविह्वलाः॥याति नाशं प्रजा तत्र पृथ्वी विभयसंकुला॥४१॥उत्तरायां यदा सौ २२
रिस्सुभिक्षं प्रचुरं जलं॥गुडतैलमहर्घत्वं दक्षिणाशा महद्भये॥४२॥हस्तनक्षत्रगः सौरी यदा वा सिंहि
कासुतः॥तदा नाशं नृपा यांति प्रजा दुर्भिक्षपीडिताः॥४३॥यदा सूर्यस्य तनयश्चित्रायां स्व समाश्रितः॥
तदा स्यात्त्वमहावृष्टिः सर्वसस्यमहर्घता॥शनिः स्वातौ विशाखायां यस्मिन्काले व्यवस्थितः॥काश्मीकुंकुम

मांजिष्ठसस्यानां क्षयमादिशेत्॥४५॥मैत्रेशाक्के यदा मंदः पश्चिमास्यां महद्भयं॥संग्रहः सर्वधान्यानां मू
ल्ये लाभश्चतुर्गुणः॥४६॥यदा सूर्यस्य तनयः पूर्वाषाढागतो भवेत्॥प्रपीड्यंते जनास्तत्र क्रये लाभश्चतु
र्गुणः॥४७॥उत्तरायां स्थितः सौरी श्रवणे वा तथैव च॥सर्वसस्यमहर्घत्वं राजानो दुःखकर्षिताः॥४८॥
धनिष्ठा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ज्यो॰क॰
२४

राम
२४